
चतुर्थः पाठः ४

# अकारान्त-नपुंसकलिङ्गशब्दप्रयोगः


मन्दिरम्



गृहम्


द्वारम्


सोपानम्



तिलकम्



उपनेत्रम्


कङ्कतम्



छत्रम्


व्यजनम्


क्रीडनकम्



पुस्तकम्



मुकुटम्


आसनम्



कृष्णफलकम्



कङ्कणम्



करवस्त्रम्



पञ्जरम्



दूरदर्शनम्



सङ्गणकम्



सीवनयन्त्रम्



चक्रम्


शकटम्



रेलयानम्


विमानम्


पर्णम्


फलम्


नारिकेलम्


नीडम्


कमलम्



पुष्पम्


## वचन-प्रयोगः


कमलम्



कमले



कमलानि



फलम्


फले


फलानि



पुस्तकम्


पुस्तके


पुस्तकानि


उपनेत्रम्


उपनेत्रे



उपनेत्राणि



छत्रम्



छत्रे


छत्राणि

## क्रिया-प्रयोगः


फलं पतति।



फले पततः।


फलानि पतन्ति।



पुष्पं विकसति।


पुष्पे विकसतः।


पुष्पाणि विकसन्ति।


कारयानं चलति।



कारयाने चलतः।


कारयानानि चलन्ति।

| | | |
|---|---|---|
| व्यजनं भ्रमति। | व्यजने भ्रमतः। | व्यजनानि भ्रमन्ति। |
| शकटं गच्छति। | शकटे गच्छतः। | शकटानि गच्छन्ति। |
| पुस्तकम् अस्ति। | पुस्तके स्तः। | पुस्तकानि सन्ति। |
| मित्रम् आगच्छति। | मित्रे आगच्छतः। | मित्राणि आगच्छन्ति। |
| पर्णं पतति। | पर्णे पततः। | पर्णानि पतन्ति। |

## अभ्यासः

**१. चित्रं दृष्ट्वा नाम लिखत -**



...........................


...........................


...........................



...........................



...........................


...........................


**२. चित्रं दृष्ट्वा उचितं वचन-प्रयोगं कुरुत -**



चक्रम्


...........................



...........................



...........................


मुकुटे



...........................


...........................



...........................


कङ्कतानि


३. चित्रं दृष्ट्वा उचित-क्रियापदेन रिक्तस्थानानि पूरयत –



फलानि .................. ।



पुष्पं .................. ।



व्यजने .................. ।

४. उदाहरणानुसारं रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा– | पुस्तकम् | पुस्तके | पुस्तकानि |
| | फलम् | .............. | .............. |
| | .............. | .............. | विमानानि |
| | .............. | आसने | .............. |
| | .............. | .............. | मन्दिराणि |
| | .............. | सोपाने | .............. |

५. क्रियापदानाम् उचित-वचनरूपैः रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा– | पतति | पततः | पतन्ति |
| | विकसति | .............. | .............. |
| | .............. | भ्रमतः | .............. |
| | .............. | .............. | हसन्ति |
| | अस्ति | .............. | .............. |
| | .............. | नमतः | .............. |

### ६. कोष्ठकात् उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयत -

(क) शकटं .................. । (चलन्ति/चलति/चलतः)

(ख) मित्रे.................... । (आगच्छतः/आगच्छन्ति/आगच्छति)

(ग) पुस्तकानि................। (सन्ति/अस्ति/स्तः)

(घ) पर्णं.....................। (पतन्ति/पततः/पतति)

(ङ) व्यजनानि................। (भ्रमति/भ्रमन्ति/भ्रमतः)

### ७. कोष्ठके प्रदत्त-शब्दस्य उचितं वचनप्रयोगं कृत्वा वाक्यानि पूरयत -

**यथा** - फले पततः। (फलम्)

(क) .................. अस्ति। (उपनेत्रम्)


(ख) .................. भ्रमन्ति। (व्यजनम्)

(ग) .................. विकसतः। (कमलम्)


(घ) .................. चलति। (रेलयानम्)


(ङ) .................. सन्ति। (सोपानम्)


### ८. चित्रं दृष्ट्वा उचितं पदं लिखत -



.................


.................


.................


.................


.................


.................

## योग्यता-विस्तारः

१. **ध्यानेन पठत अवगच्छत च -**

फ् + अ + ल् + अ = फल ( फल + म् = फलम् )

प् + उ + ष् + प् + अ = पुष्प ( पुष्प + म् = पुष्पम् )

प् + उ + स् + त् + अ + क् + अ= पुस्तक ( पुस्तक + म् = पुस्तकम् )

एते सर्वे नपुंसकलिङ्गशब्दाः। एतेषाम् अन्ते 'अ' (अकारः) अस्ति, अतः एते अकारान्त-नपुंसकलिङ्गशब्दाः सन्ति ।

> येषां नपुंसकलिङ्गशब्दानाम् अन्ते अकारः भवति, ते अकारान्त-नपुंसकलिङ्गशब्दाः भवन्ति।
> **यथा** - फलम् (फल), पुष्पम् (पुष्प), चित्रम् (चित्र) इत्यादयः।

२. द्वितीय-तृतीय-चतुर्थपाठेषु भवन्तः विविधशब्दानां परिचयं प्राप्तवन्तः ।

- द्वितीयपाठे गणेशः, घटः, विद्यालयः इत्यादयः अकारान्त-पुँल्लिङ्गशब्दाः पठिताः ।
- तृतीयपाठे दुर्गा, स्थालिका, पाकशाला इत्यादयः आकारान्त-स्त्रीलिङ्गशब्दाः पठिताः ।
- तृतीयपाठस्य योग्यताविस्तारे लेखनी, नदी, नर्तकी इत्यादयः ईकारान्त-स्त्रीलिङ्गशब्दाः अपि पठिताः ।
- चतुर्थपाठे फलम्, पुष्पम्, मन्दिरम् इत्यादयः अकारान्तनपुंसकलिङ्गशब्दाः पठिताः ।

३. एतेषां शब्दानां त्रिषु वचनेषु रूपाणि अपि पठितानि।

**यथा -**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| बालकः | बालकौ | बालकाः |
| बालिका | बालिके | बालिकाः |
| लेखनी | लेखन्यौ | लेखन्यः |
| फलम् | फले | फलानि |

एतानि सर्वाणि प्रथमाविभक्ति-रूपाणि सन्ति ।

४. यः क्रियां करोति, सः '**कर्ता**' भवति। कर्ता यस्मिन् शब्दे भवति, तस्मिन् शब्दे प्रथमा विभक्तिः भवति। प्रथमा-विभक्तेः अनुसारम् एव क्रियायाः प्रयोगः भवति। प्रथमा-विभक्तेः रूपं यस्मिन् वचने भवति, क्रियायाः रूपम् अपि तस्मिन् एव वचने भवति।

**यथा** –

| | | | | | |
|---|---|---|---|---|---|
| बालकः | गच्छति । | बालकौ | गच्छतः । | बालकाः | गच्छन्ति । |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| एकवचनम् | एकवचनम् | द्विवचनम् | द्विवचनम् | बहुवचनम् | बहुवचनम् |
| छात्रा | लिखति। | छात्रे | लिखतः। | छात्राः | लिखन्ति। |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| एकवचनम् | एकवचनम् | द्विवचनम् | द्विवचनम् | बहुवचनम् | बहुवचनम् |

### अवधेयम्

**संस्कृते सप्त विभक्तयः सन्ति –**

१. प्रथमा विभक्तिः
२. द्वितीया विभक्तिः
३. तृतीया विभक्तिः
४. चतुर्थी विभक्तिः
५. पञ्चमी विभक्तिः
६. षष्ठी विभक्तिः
७. सप्तमी विभक्तिः

५. भवतां परिवेशे येषां नामानि अकारान्त-नपुंसकलिङ्गे सन्ति, तेषां नामानि लिखन्तु ।

## आगच्छन्तु, वयं खेलामः

द्वितीय-तृतीय-चतुर्थपाठेषु वयं बहून् संस्कृतशब्दान् पठितवन्तः। एतेषां शब्दानाम् आधारेण वयम् एकां क्रीडां कुर्मः:-

### शब्द-स्मरणक्रीडा

सर्वे छात्राः मण्डलाकारे उपविशन्ति।

अध्यापकः सूचयति – ''प्रत्येकं छात्रः स्वस्थाने उत्थाय निरन्तरं पूर्वपठितान् संज्ञाशब्दान् वदिष्यति। यः छात्रः एकस्मिन् अवसरे सर्वाधिक-शब्दान् वदिष्यति, सः विजयी भविष्यति। शब्दकथनसमये मध्ये विरामः न भवतु।एकस्य शब्दस्य द्विवारम् उच्चारणं न करणीयम्।''

छात्राः एकैकशः शब्दान् वदन्ति। अध्यापकः प्रत्यकेन छात्रेण उच्चारितशब्दान् ध्यानेन शृणोति, तेषां गणनां कृत्वा श्यामपट्टोपरि छात्रस्य नाम्नः सम्मुखे लिखति। अन्ते विजयिनः छात्रस्य नामघोषणां करोति। अत्र ध्यानं दातव्यं यत् शब्दानाम् उच्चारणं शुद्धं स्पष्टं च भवेत्।

## वर्ण-विलासः

**ध्यानेन पठत-**

मन्दिरम् = म् + अ + न् + द् + इ + र् + अ + म्

म न् दि रम्

| | |
|---|---|
| द् + व् + आ + र् + अ + म् = | द्वारम् |
| ग् + ऋ + ह् + अ + म् = | गृहम् |
| ख् + आ + द् + अ + त् + इ = | खादति |

– तिलकम्, मुकुटम्, कङ्कणम्, पञ्जरम्, विकसन्ति– एतेषाम् अपि पदानां वर्णविच्छेदं कुरूत।